Class-VIII TOTAL NO OF PAGES- 8

Final Examination 2024-25

Sanskrit

Set-A

नाम – .......................... कक्षा व अनुभाग – .............

अवधिः– होराद्वयम् पूर्णांकाः–60

निर्देशाः

i. समस्ताः प्रश्ना अनिवार्याः सन्ति।
ii. उत्तराणि संस्कृते एव लेखनीयानि।
iii. अस्मिन् प्रश्नपत्रे 16 प्रश्नाः एवम् 8 पृष्ठानि च सन्ति ।

प्र–1 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। 10

स्वच्छ भारतं प्रायः अधिकांशानां भारतीयानां स्वप्नः अस्ति परं स्वप्नमात्रेण तु स्वच्छता न भविष्यति। वयं सर्वे मिलित्वा अस्यां दिशायां प्रयासं कुर्याम। वयं पश्यामः यत् जनाः मार्गेषु अथवा सार्वजानिकेषु स्थानेषु यत्र कुत्रापि अवकरं क्षिपन्ति, किम् इदम् उचितम् अस्ति? एतत् न करणीयम् यतः सर्वकारः एकाकी एव इदं कार्यं सफलं कर्तुं न शक्नोति। यदि वयम् अपि सहायतां करिष्यामः जागरुकाः च भविष्यामः तदा अयं स्वप्नः अवश्यमेव पूर्णः भविष्यति।

1. एकपदेन उत्तरत–
i. जनाः मार्गयु किं क्षिपन्ति? _______________

ii. स्वच्छं भारतं केषां स्वप्नः अस्ति? _______________

2. पूर्णवाक्येन उत्तरत–

i. अयं स्वप्नः कदा पूर्णः भविष्यति?

.................................................................................................................................................

ii. वयं किं पश्यामः?

.................................................................................................................................................

3. निर्देशानुसारम् उत्तरत–

i. 'स्वच्छ भारतं भारतीयानां स्वप्नः अस्ति' इति वाक्ये 'भारतम्' इति पदस्य विशेषणपदं किम्?

(क) भारतीयानाम्

(ख) स्वप्नः

(ग) अस्ति

(घ) स्वच्छम्

ii. 'कुर्याम' इति क्रियापदस्य कर्तृपद किम्?

(क) स्वच्छता

(ख) जनाः

(ग) वयम्

(घ) सर्वकारः

iii. 'एतत् न करणीयम्' इति वाक्ये अव्ययपदं किम्?

(क) एतत्

(ख) न

(ग) कार्यम्

(घ) करणीयम्

iv. 'स्वच्छता' इति कर्तृपदस्य क्रियापदं गद्यांशे किं प्रयुक्तम्?

(क) भविष्यति

(ख) क्षिपन्ति

(ग) अस्ति

(घ) करिष्यामः

प्र-2 चित्रं दृष्ट्वा पंचवाक्यानि रचयत- 1X5=5



**मञ्जूषा**- चटका,वृक्ष: , तिष्ठति , सूर्य: , उदेति, पर्वता: सन्ति , मेघा: बालक: , बालिका:

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

प्र- 3 अवकाश-याचनार्थं प्रधानाचार्य प्रति प्रार्थनापत्रम्- 4

श्रीमन्तः प्रधानाचार्य महोदयाः

केन्द्रीय विद्यालयः

जनकपुरी

नव दिल्ली

_____________ महोदया :

विषयः अवकाश-याचनार्थं प्रधानाचार्यं प्रति प्रार्थनापत्रम्।

सविनयं _____________ इदम् अस्ति यत् गतदिवसात् अहं _____________ ग्रस्तः अस्मि। अत :

_____________ आगन्तुम् असमर्थः। एतदर्थं कृपया मह्यम् दिनद्वयस्य _____________ ददातु भवान्

इति _____________।

भवदीयः आज्ञाकारी _____________

_____________

अनुक्रमाङ्कः : 35
अष्टमी कक्षा।

| शिष्यः, अवकाशम्, ज्वरेण, निवेदनम्, विद्यालयम्, आदरणीयाः, अमिताभः, प्रार्थना। |
|---|

प्र-4. संवादपूर्तिः कृत्वा लिखत – 4

अध्यापकः – सुधीर, त्वम् किम् इच्छसि ?

सुधीरः – श्रीमन्, अहम् सेवम् खादितुम् ..............................|

अध्यापकः – राधिके, तुभ्यं किं ..............................?

राधिका – मह्यम्, ..................रोचते ।

अध्यापकः – शोभने, तव किं प्रियम् ?

शोभना – .............................. नारिकेलम् प्रियम्।

| मह्यम् , इच्छामि, रोचते, नारङ्गम् |
|---|

प्र–5 संधिं कृत्वा लिखत – 2

(क) <u>हिमालयः</u> पर्वतानां राजा। . . . . . . . . . . . . . . . . . . . . . . . .

(ख) <u>गणेशः</u> एव गजाननः। . . . . . . . . . . . . . . . . . . . . . . . .

प्र–6 उचित–अव्ययपदैः रिक्तस्थानानि पूरयत – 4

(क) यथा राजा . . . . . . . . . . . . प्रजा

(ख) अहम् . . . . . . . . . . . . . . पाठम् पठामि ।

(ग) गजः . . . . . . . . . . . . . . . . . चलति।

(घ) राधा लता . . . . . . . . . . मम भगिन्यौ ।

| च , शनैः , तथा, अपि |
|---|

प्र–7 उचितप्रत्ययान् चित्वा लिखत – 2

(क) वयम् पाठम् पठ्+तुमुन् इच्छामः।

(क) पाठितुम् (ख) पठितुम् (ग) पथितुम्

(ख) भोजनम् खादित्वा अहम् शयनम् करोमि।

(क) खाद्+क्त्वा (ख) खद्+कत्वा (ग) खद +क्त्व

प्र–8 उचितविभक्तिं चित्वा लिखत – 2

(क) ............. परितः वृक्षाः सन्ति। (ग्रामम्, ग्रामेण, ग्रामात्)

(ख) अलम् ................ । (कोलहलम्, कोलाहलेन, कोलाहलस्य)

प्र-9 संख्यापदै: रिक्तस्थानानि पूरयत- 3

i. मम पार्श्वे ........................................ (50)रुप्यकाणि सन्ति।

ii.अस्मिन् गृहे ............................................... (63) बालिका: सन्ति ।

iii.करण्डके ................................................(75) आम्राणि सन्ति ।

प्र–10 उचितशब्दरूपैः रिक्तस्थानानि पूरयत– 2

(i) ................... विद्यालयम् गच्छामः।

(क) वयम् (ख) सा (ग) तव (घ) अस्मत्

(ii) ..................... अष्टमी कक्षायां पठामि ।

(ख) सः (ख) सा (ग) अहम् (घ) तस्याः

प्र-11 उचितधातुरूपै: रिक्तस्थानानि पूरयत- 2

i. माता स्वर्गात् अपि उच्चतर: ............................।

(क)भवति (ख) अभवम् (ग) भव (घ) भवतु

ii. पुरा एक: नृप: शासनम् .......................।

(क)अकरोत् (ख) अकुर्वन् (ग) कुरु (घ) करिश्यन्ति

प्र- 12 निम्नलिखितं संवादं पठित्वा प्रश्नान् उत्तरत- 5

**अध्यापिका** - इमाः सप्तभगिन्यः स्वीये प्राचीनेतिहासे प्रायः स्वाधीनाः एव दृष्टाः। न केनापि शासकेन इमाः स्वायत्तीकृताः। अनेक-संस्कृति-विशिष्टायां भारतभूमौ एतासां भगिनीनां संस्कृतिः महत्त्वाधायिनी इति।

**तन्वी** - अयं शब्दः सर्वप्रथमं कदा प्रयुक्तः ?

**अध्यापिका** - श्रुतमधुरशब्दोऽयं सर्वप्रथमं विगतशताब्दस्य द्विसप्ततितमे वर्षे त्रिपुराराज्यस्योद्‌घाटनक्रमे केनापि प्रवर्तितः। अस्मिन्नेव काले एतेषा राज्यानां पुनः सङ्.घटनं विहितम्।

I. एकपदेन उत्तरत-

i. कासां संस्कृतिः महत्वाधायिनी ? ..............................................

ii. एतासां संस्कृतिः कुत्र महत्वाधायिनी ? ..............................................

II. पूर्णवाक्येन उत्तरत-

i. अयं शब्दः सर्वप्रथमं कदा प्रयुक्तः ?

..............................................................................................................................

..............................................................................................................................

निर्देशानुसारम् उत्तरत-

i. 'पुनः' अस्य पर्यायं चिनुत-
(क) कदा (ख) अयम् (ग) भूयः (घ) केनापि

ii. 'महत्वाधायिनी' इति कस्य पदस्य विशेषणम् ?
(क) संस्कृतिः (ख) भगिनी (ग) भारतभूमिः (घ) विशिष्टा

प्र-13 अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत- 5

जनवरी मासस्य तृतीये दिवसे 1831 तमे ख्रिस्ताब्दे महाराष्ट्रस्य नायगांव-नाम्नि स्थाने सावित्री अजायत। तस्याः माता लक्ष्मीबाई पिता च खंडोजी इति अभिहितौ। नववर्षदेशीया सा ज्योतिबा फुले महोदयेन परिणीता। सोऽपि तदानीं त्रयोदशवर्षकल्पः एव आसीत्। यतोहि सः स्त्रीशिक्षायाः प्रबलः समर्थकः आसीत् अतः सावित्र्याः मनसि स्थिता अध्ययन अभिलाषा उत्सं प्राप्तवती।

एकपदेनउत्तरत-

i. ज्योतिबा कस्याः समर्थकः ? ......................................

ii. कति वर्षीया सावित्री परिणीता ? ......................................

I. पूर्णवाक्येन उत्तरत-

i. सावित्र्याः माताः पित्रोः नाम किम् ?

..............................................................................................................................

..............................................................................................................................

II. निर्देशानुसारम् उत्तरत-

i. 'प्राप्तवती' क्रियायाः कर्तृपदं किम् ?

(क) अभिलाषा (ख) अध्ययनम् (ग) उत्सम् (घ) स्थिता

ii. 'समर्थकः' पदस्य विशेषणं किम् ?

(क) सः (ख) स्त्रीशिक्षा (ग) प्रबलः (घ) अतः

प्र-14 अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत- 5

त्रिशूलाग्निनागैः पृथिव्यस्त्रघोरैः अणूनां महाशक्तिभिः पूरितेयम्।
सदा राष्ट्ररक्षारतानां धरेयम् क्षितौ राजते भारतस्वर्णभूमिः॥

(क) एकपदेन उत्तरत-

(1) भारतभूमिः केषाम् धरा अत्र कथिता ?.........................

(2) इयम् धरा केषाम् महाशक्तिभिः पूरिता ? .................................

(ख) पूर्णवाक्येन उत्तरत-

(1) कुत्र राजते भारतभूमिः ?

..............................................................................................................................

(ग) निर्देशानुसारम् उत्तरत-

(1) धरा इयम् अनयोः पदयोः किम् विशेषणपदम् ?.....................................

(2) 'राजते' इति क्रियापदस्य किं कर्तृपदम्? .........................

प्र-15 - रेखांकितं पदमाधृत्य प्रश्ननिर्माणं कुरूत- 3

i. <u>काष्ठपीठे</u> उपविशामः।

..................................................................................

ii. सदैव खाद्यानभाण्डम् सुपूर्णम् भवति ।

..................................................................

iii. विपरीतं तु वर्जयेत् ।

....................................................................................

प्र-16 विशेषण-विशेष्यपदानाम् उचितमेलनम् कृत्वा लिखत – 2

पीयूषतुल्यम् - अस्त्रैः

बहुनाम् - जलम्

घोरैः - पूर्णः

प्रयासः - मतानाम्

................................ - ......................................

................................ - ......................................

................................ - ......................................

................................ - ......................................

................................ - ......................................